Roll No...........................
Signature of Invigilator .........

Paper Code

BV-303

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination Jan. – Feb. -2022

### बी. ए. व्याकरण, तृतीयसत्रम्
### व्याकरणम्, तृतीयपत्रम्
### संस्कृतसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

प्र01. कारकसमास शब्दव्युत्पतिपदार्थदिपुरस्सरम् पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। (5 x2=10)

1. धातुरागरम्भधृत्योश्च स्यामविक्रमयोरपि।
   नित्यं मनसि कार्यस्ते बाध्यमानेन निद्रया।।
2. पूर्वं यामं त्रियामायाः प्रयोगणातिनाम्य तु।
   सेव्या शय्या शरीरस्य विश्रामार्थं स्वतन्त्रिणा।।
3. स्वभूमिषु गुणाः सर्वे ये च शीलादयः स्थिता।
   विकीर्णा इव गा गोपं स्मृतिस्तानुगच्छति।।

प्र02. छन्दोऽलङ्कारादिनिर्देशपुरस्सरम् अधो निर्दिष्टेषु श्लोकेषु द्वयोः समाधानं कुरु। (5 x2 =10)

1. प्रदीप्ते जीवलोके हि मृत्युव्याधिजराग्निभिः।
   कः शयीत निरुद्वेगः प्रदीप्त इव वेश्मनि।।
2. द्वाराध्यक्ष इव द्वारि प्रणिहिता स्मृति।
   धर्षयन्ति न तं दोषाः पुरं गुप्तविवारयः।।
3. सख्यः स तु दोषाणां यो हीन स्मृतिवर्मणा।
   रणस्थः प्रतिशत्रुणा विहीन इव वर्मणा।।

## (खण्ड -ख)

प्र01. पृष्टेषु त्रिषु द्वयोः सप्रसंगव्याख्या कुरु। (5 x2 =10)

1. अहो चिररात्राय सुप्तोऽहं स्वप्नजाल परतन्त्रेणैव महान् पुण्यमयः समायोऽतिवाहितः, सन्ध्योपासनसमयोऽस्मद्गुरुचरणानां, तत् सपदि अवचिनोमि कुसुमानीति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय पुटकं विधाय पुष्पावचयं कर्तुमारेभे।।

2. अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियमसम्पादनाय प्रयाते गौरवटौ छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु "इत आगम्यतां सनाध्यतामेष आश्रमः" इति सप्रणाममभिगम्य वदत्सु निखिलेषु योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारूरोह, उपाविशच्च।।

3. तदाकर्ण्य दुखितश्चकितश्च योगिराडुवाच- "कथमेतत्? ह्य एव पर्वतीयाञ्छकान् विर्निर्जित्य महता जयघोषेण स्वराजधानीमायातः श्रीमानादित्यपदलाञ्छनो वीरविक्रमः अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्भूयन्ते। अधुनापि तेषां पटहगोमुखादीनां निनादं कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षाणां सप्तदश शतकानि व्यतीतानि इति।।

प्र02. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। **( 5 x2 =10)**

1. निश्वाससारं लिख्यताम्।
2. कविपरिचयं प्रस्तूयताम्।
3. ग्रन्थकारस्य काव्यसौन्दर्यं लिखत।

प्र03. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। **( 2.5 x2 =05)**

1. गौरब्रह्मचारिणश्चरित्रचित्रणं कुरुत?
2. कथानके श्यामवर्णस्य ब्रह्मचारिणो वर्णनं करोतु।
3. प्रातः कालस्य दृश्यस्य वर्णनं कथानुसरेण स्व शब्दैः क्रियताम्।

## ( खण्ड -ग)

प्र01. पृष्टेषु सप्तसु प्रश्नेषु पञ्चानां समाधानं कुरु । **( 5 x5 =25)**

1. काव्यस्य कतिधा विभागः कृतः? तेषां लक्षणं च वदतु।
2. अभिनयस्य स्वरूपं भेदाश्च गदत।
3. पूर्वरङ्गस्य लक्षणं लिखत। नान्दीनां किं स्वरूपमाह भरतः?
4. नाटकस्य पूर्वकृत्यं किं कि भवति?
5. अङ्कलक्षणं कथयतु।
6. कथोत्घातकस्य लक्षणोदाहरणे उच्यताम्।
7. अवलिगतस्य लक्षणोदाहरणे कथ्यताम्।

**--------------x--------------**